National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 29-33
© 2026 NJHSR
www.sanskritarticle.com

**मानसी सरदार**
अनुसन्धात्री, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**मानसी सरदार**
अनुसन्धात्री, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# व्याकरणमहाभाष्ये सूक्तिः

**मानसी सरदार**

**व्याकरणशास्त्रस्य वैशिष्ट्यम्**

धर्मार्थकाममोक्षाख्यपुरुषार्थफलप्रदाने कर्मनिबन्धने नानाविध सुखदुःखज्वालासमाकुलिते विचित्रेऽस्मिन् जगतीतले अतीवदुर्लभं मानवजन्म। मानवजन्मलब्धाऽपि धर्मसाधनमन्तरा न पुरुषार्थसिद्धिः। धर्माधर्मविवेकश्च साङ्गोपाङ्गवेदाध्ययनमन्तरेण न भवितुमर्हति। तदुक्तं भगवता पतञ्जलिना-

**'ब्राह्मणेन निष्कारणो[1] धर्मःषडङ्गो वेदोऽध्येयो ज्ञेयश्चेति।'**

वेदाः मानवसंस्कृतेर्मूलभूताः महानिधयः, अपौरुषेया अत एव नित्याश्च। तदुक्तं यजुर्वेदे-

**"तस्मद्यज्ञात् सर्वहुतःऋचः सामानि यज्ञिरे।**
**छन्दासिं जज्ञिरे तस्माद् यजुस्तस्मादजायत ।।"**[2] इति।

वैदिकाः लौकिकाश्च सर्वे शब्दाः नित्याः। वेदानां साधु ज्ञानार्थं षण्णां वेदाङ्गानां ज्ञानमनिवार्यम्। वेदाङ्गानि षट्- शिक्षा, व्याकरणम्, छन्दः, ज्योतिषम्, निरुक्तम्, कल्पश्चेति। तदुक्तं-

**"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।**
**ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ।।"**[3]

प्रत्येकस्य वेदाङ्गस्य उपयोगितामाश्रित्य वेदस्य शरीरावयवरूपेण तस्य उच्चावचं महत्त्वं प्रोच्यते –

**"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।**[4]
**शिक्षा घ्रणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।"**[5]

अत्र**'मुखं व्याकरणं स्मृतम् '** इति उदघोषयता शिक्षाकारेण षडङ्गेषु व्याकरणस्य मुख्यत्वं प्रतिपाद्यते। महर्षिणा पतञ्जलिनाऽपि एतदेव व्यादिष्टम् **-"प्रधानं चषट्स्वङ्गेषु व्याकरणम्"**इति। शरीरावयवेषु प्रधानाङ्गं मुखमिव वेदाङ्गेषु व्याकरणं प्रधानम्। व्याकरणं वेदस्य मुखस्थानीयम्।

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्युत्पत्या करणार्थकल्युट्प्रत्ययान्तोऽयं व्याकरण शब्दः। शब्दानुशासनम् इति व्याकरणस्यान्वर्थं नाम। अनुशिष्यन्ते असाधुशब्देभ्यो बोध्यन्ते इत्यनुशासनं शब्दानुशासनम् इति व्युत्पत्या करणार्थकल्युट् प्रत्युयान्तः **'शब्दानुशासन'**शब्दो निष्पद्यते। **'शास्त्र'**पदेन सामानाधिकरणयाच्छब्दानुशासनं नाम शास्त्रम्, तच्च व्याकरणमेव।

अतएव भगवता पतञ्जलिना**-'अथ शब्दानुशासनम्'**[6] इति व्याकरणस्य साक्षात् प्रयोजनमभिहितम्। सन्ध्योपसनादिनित्यकर्मवत् व्याकरणशास्त्राध्यनस्य किं प्रयोजनमिति जिज्ञासायां व्याकरणमहाभाष्ये भगवता पतञ्जलिना प्रोक्तम् -

कानि पुनः शब्दानुशासनस्य[7] प्रयोजनानि? रक्षोहागमलघ्वसन्देहाः प्रयोजनम्। इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि - तेऽसुराः, दुष्टः शब्दः, यदधीतम्, यस्तु प्रयुङ्क्ते, अविद्वांसः, विभाक्तिं कुर्वन्ति, यो वा इमाम्, चत्वारि, उत त्व, सक्तुमिव, सारस्वतीम्, दशम्यां पुत्रस्य, सुदेवो असि वरुण[8] इति।

व्याकरणमहाभाष्यस्य प्रयोजनानि उक्त्वा तत् परम् अहं सूक्तिविषये किञ्चित् आलोचयामि।

सूक्तिः अस्माकं धर्मिक-सांस्कृतिकप्रवृत्तेः प्रतिविम्वितं रुपं भवति। धार्मिकप्रवृत्तिः सा भवति येन सह धर्म-कर्म, भक्तिः, ईश्वरः, यज्ञ-यागादि विषयेन सह सम्बन्धः भवति। कस्मिन्नपि देशस्य जातेः वा समाजस्य लोकानां आध्यात्मिकः, नैतिकः, बौद्धिकः, आन्तरिकः तथा मानसिक उन्नतेः परिचायकः सर्वैः प्रकारस्य परम्परागतरीति-नीतिः, कला-कौशलादि विषयस्य सामूहिकरुपं**'संस्कृतिः'**इति कथ्यते।

**सु+उक्तिः**सूक्तिः भवति सुन्दरा उक्तिः अर्थात् कुशलेन सुन्दरेण च कथ्यते इयमुक्तिः सूक्तिः कथ्यते। सूक्तिः नैतिकतापूर्णं सुन्दरभावयुक्तश्च। महन्तः प्रतिभावन्तः, मनीषयः, वीराः, सन्तश्च सर्वेषां प्रभावी चमत्कारिता यादृशी प्रभावोऽस्ति तेषां प्रेरयितुं उत्साहितुं आनन्दाय विजिगिषु करणाय समर्थप्रेरकवाणीनां चित्वा वाक्ये शब्दे वा अभिव्यक्ता मानवसमाजे सूक्तिः इति रुपेणव्यवह्रियते। यथा **-'हितं मनोहारि च दुर्लभं वचः'** वस्तुतः सूक्तेः लोकोक्तिः कथितुं शक्यते। द्वयोः मध्ये विशेष अन्तरः।

**शब्दं कुरु, मा शब्दं कार्षी, शब्दकार्ययं माणवकः इति ध्वनिं कुर्वन्नेवमुच्यते ।**[9]

महाभाष्यस्य प्रथमाध्यायस्य प्रथमपादस्य पस्पशाह्निके शब्दतत्त्वस्य निरूपणावसरे अयं लौकिकसन्दर्भः समागतः। कः शब्दः इत्यस्य उत्तरं वक्तुं लौकिकोदाहरणमिदं प्रोक्तम - कश्चन ध्वनिं कुर्वन्तमुपदिशति शब्दं कुरु, मा शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः इति व्यवह्रियते।

एवं हि दृश्यते लोके ध्वनिं कुर्वता शब्दः बोध्यते। यथा दूरे विद्यमानं गोवत्समपि यदा गौः ध्वनिं कृत्वा अन्तिकम् आह्वयति, तत्रापि गौरियं शब्दं करोतीति उच्यते। सः शब्दः ध्वनिः इति उच्यते। एवमेव गृहे कश्चन ज्येष्ठः ध्वनिना एव शब्दं कुर्वन्तं बालं वदति यत् शब्दं मा कार्षीः इति।

**तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्रह्मणेन न म्लेच्छतवै नापभाषितवै, म्लेच्छोह वा एष यदपशब्दः ।**[10]

महाभाष्यस्य प्रथमाध्यायस्य प्रथमपादस्य पस्पशाह्निके शब्दानुशासनस्य आनुषाङ्गिकप्रयोजनेषु प्रथमप्रयोजनमिदं प्रोक्तम्। असुरदेवतानां युद्धप्रसङ्गे, असुराः हेलयो हेलयः इति प्रयुञ्जानाः पराजिताः। अतः ब्रह्मणेन म्लेच्छवत् न भाषितव्यम्।

दृश्यते हि लोके देवता पूजनादिप्रसङ्गे देवपूजकेन अवैयाकरणेन संकल्पसन्दर्भे लक्ष्म्याः स्थैर्यतासिद्धमिति संकल्पः क्रियते। परं स्थैर्यता इति भावार्थे प्रत्ययद्वयं न भवति। एवमेव मङ्गलवासर इति वक्तव्ये मङ्गलवासर इति, कालिदास इति वक्रव्ये कालिदास इति व्यवुहारः क्रियते। अतः संस्कारवद्भिः सर्वैः भाव्यम्।

**नौर्नावि बद्धा नेतरेतरत्राणाय भवति**[11]

महाभाष्यस्य प्रथमाध्यायस्य प्रथमपादस्य तृतीयाह्निके **'वृद्धिरादैच्'** इति सूत्रभाष्ये**'सतो वृद्धादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः'** वार्तिके इति दृश्यते। नावि बद्धा नौः परस्परं परित्राणाय न भवतीति तद्वद् सतामादैचां संज्ञा कार्या, संज्ञयाचादैचो भैव्यते इति अन्योन्याश्रयः कार्यम्, तत् न सिध्यति।

दृश्यते हि लोके मार्गे गमनसमये कस्यचित् कारयानं मध्ये चलितुमसमर्थं चेत् तदन्येन कारयानेन सह रज्ज्वा बद्धा अन्यत्र नेतुं शक्यते। तत्र कृतेऽपि बन्धेन यानमग्रे तु गच्छत्येव परन्तु यानस्य दिशं परिवर्तयितुं तत्र चालकस्तु अपेक्षते एवेति।

**तीर्थकाका न चिरं स्थातारो भवन्ति**[12]

प्राणिनां चञ्चलस्वभावज्ञापक इयं सूक्तिः। तीर्थे काको न चिरं तिष्ठति, तद्वदध्ययनार्थं गुरुकुलं गत्वा यश्चिरं न तिष्ठति सोऽभेदाध्ययनव-सायात् तीर्थकाको इत्युच्यते। अत्रोस्य तीर्थकाक पदं न तीर्थ-काकपरम्। किन्तु तद्वच्चञ्चलार्थ बोधकम्।

**'ध्वाङ्क्षेण क्षेपे'**[13] इति सूत्रे भाष्ये धाङ्क्षवाचिना सह सप्तम्यन्तं समस्यते निन्दयाम। ध्वाङ्क्षेणे- त्यर्थ ग्रहणम्। तेन तीर्थकाको तीर्थधाङ्क्ष्यः वा इत्यपि सिद्ध्यतीत्युक्तम्। नन्वत्र तीर्थकाकपदाभ्यामा- धारेधेयमात्रावगमात् क्षेपो नास्तीति चेन्न। उपमानोपमेयभावेन कार्येषु अस्थिरत्वात् क्षेपः समासात् प्रती- यते।

लोके दृश्यते यत् धार्मिकभावनात् प्रारितभूत्वा जनाः स्वस्य मृतव्यक्तेः श्राद्धादि कर्मादि कोऽपि विषेषस्थाने क्रियते, तत् विशेषस्थानं तीर्थस्थानं कथ्यते। यः ग्रामात् वहिः उद्यानादिषु भवति, तत् तीर्थ-स्थानं गताः काकाः तत्र चिरं न तिष्ठिन्ति केवलं उदरपूर्तिं कुर्वन्ति यावत्कालं यावत् अक्षुण्यानि खाद्यप- दार्थानि उपलभ्यन्ते तावत् पर्यन्तं तत्रैव तिष्ठन्ति। 'तीर्थकाका न चिरं स्थातारो भवन्ति'। अतः काकः निन्दितपक्षी इति उच्यते, निन्दारूपकत्वेन तीर्थकाकः इति उपाधिं प्राप्नोति।

एतस्य सुभाषितस्य माध्यमेन पतञ्जलिना 'क्षेप' इति शब्दस्य विषये व्याख्यातं यत् यः व्यक्तिः गुरुकुलं गत्वा तपस्यां कर्तुम् असमर्थः भवति, अल्पकालमेव तत्र तिष्ठति, सम्पूर्णतया न पठति, स्वार्थात् दुःखं न प्राप्नोति सः तीर्थकाकः तीर्थधाङ्क्षः वा उच्यते, सः निन्दितः इति मन्यते।यथा- यः काकः तीर्थस्थानं गत्वा स्वार्थात् उदरपूर्णं कर्तुम् एकमात्रम् अभिप्रायेण चिरकालं न तिष्ठति सःनिन्दारूपेण तीर्थकाकः तीर्थधाङ्क्षः वा इति उपाधिं प्राप्नोति; निन्दितः इति उच्यते।**"यथातीर्थकाकानचिरंस्थातारोभवन्तिएवंयोगुरुकुलानिगत्वान चिरंतिष्ठति,सउच्यतेतीर्थकाकइति "**।[14] क्षेप इत्यर्थ निन्दा।

व्यवहारेऽपि वयं पश्यामः यत् यः केवलं स्वार्थी स्वलाभं पश्यति सः स्वार्थीत्वात् निन्दितः इति मन्यते, तस्य समाजे आदरः नास्ति अतएव जनाः तं तीर्थकाका इति कथयन्ति, तस्य विषये वदन्ति **च"तीर्थकाका न चिरं स्थातारो भवन्ति"।**

**भवति वा प्रत्यक्षादायनुमानबलीयस्त्वम्**[15]

**'लँटः शर्तृशानचावप्रथमासमानाधिकरणे'**[16] इति सूत्रस्य व्याख्यानस्य सन्दर्भे एतत् सुभाषितं प्रयुक्तमस्ति। कदाचित् किमपि विषये ज्ञानं दातुम् 'अनुमानं' प्रयुज्यते इति जनसामान्ये दृश्यते, शक्ति- शाली अपि भवति। 'अलातचक्र'(दग्धाङ्गारस्य गोलवृत्तम्) स्पष्टतया दृश्यते अर्थात् अतिवेगेन परिभ्र-मणात् ते 'अलात'(दग्ध-अङ्गाराः) वृत्तवत् दृश्यन्ते, किन्तु 'वस्तुतः ते चक्राः न सन्ति' अत्र अनुमानेन वयं 'चक्रस्याभावः' इति जानीमः। यदा यत् वस्तु यादृशः दृश्यते तत् वस्तु वास्तवरूपे तादृशः न भवति, तदा सूक्तेः प्रयोगं भवति एवञ्च अनुमानेन वस्तुस्थितेः ज्ञानं जायते**-"भवति वै प्रत्यक्षादा-यनुमानबलीयस्त्वम्"।**

एतया उक्तया माध्यमेन पतञ्जलिना पूर्वपक्षस्य शङ्का निकाकृता यत् **'लँट्'**इत्यत्र प्राथमिकता- युक्तः प्रत्यक्षः समानाधिकरणं नास्ति चेदपि यदा **'शर्तृ''शानच्'**च अप्रथमा समानाधिकरणं भवति तदा तेषां स्थाने 'लँट्' इति आवश्यकं भवति इति क्रमादानुमानं भविष्यति; यथा**'अलातचक्रस्याभावः'**नस्पष्टोऽपि तदनुमानेन अवगन्तुं ज्ञानं प्राप्यते**-"भवतिवैप्रत्यक्षादनुमानबलीयस्त्वम्।तद्यथा-अलातचक्रं प्रत्यक्षं दृश्यते, अनुमानाच्च गम्यते नैतदस्ति "**[17]इति।

व्यवहारेऽपि वयं दूरतः पर्वतात(परतः) कस्यचित् गृहात् धूममागच्छन्तं पश्यामः तदा वयं तत्र अग्निः अस्ति इति अनुमानाधारेणदानीमः। यद्यपि अग्नि प्रत्यक्षतया न दृश्यते तथापि अनुमानाधारेण तत्र अग्निज्ञानं प्राप्तम्। यतः वयं जानीमः यत् यत्र यत्र

धूमः भवति तत्र तत्र अग्निः अवश्यमेव भवति। अतएव एतत् सुभाषितम्- 'भवति वै प्रत्यक्षादप्यनुमानबलीयस्त्वम्'

**न हि 'भिक्षुकाः सन्ति' इति स्थाल्यो नाधिश्रीयन्ते**[18]

**'भिक्षुकाःपरिभ्रमन्ति'**इति दृष्ट्वा चिन्तयन् वा जनाः गृहे भोजनं न कुर्वन्ति न तथा भोजनं सञ्चयन्ति एव।**'ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे'**[19] इति सूत्रस्य विमश्श्सय प्रसङ्गे एतत् सुभाषितं[20] प्रयुक्तमस्ति। भिक्षायाचनाय याचकाः इतस्ततः भ्रमन्ति इति लोके दृश्यते। याचकं दृष्ट्वा जना चिन्त- यन्ति यत् 'भिक्षुकाः आगमिष्यन्ति, तेभ्यः भोजनं दातव्यं भविष्यन्ति; अतः अन्नं न सज्जीकर्तव्यम्' एतत् न भवति, न कश्चित् एतत् करोति; जनाः स्वगृहे भोजनं पचति। आम्, याचकाः गृहमागच्छन्ति चेदपि तेषां व्यवस्था क्रियते। न कश्चित् कदापि चुल्हे भोजनं न अर्पयितुं चिन्तयन्ति न च सः अन्नं सज्जीकरोति- "न हि 'दोषाः सन्ति' इति परिभाषा न वक्तव्या लक्षणं वा न प्रणेयम्। न हि 'भिक्षुकाः सन्ति' इति स्थाल्यो नाधिश्रीयन्ते "।[21]

**न हिदेवत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति**

यदि देवदत्तस्य हतः तर्हि देवदत्तः न उद्भवति अर्थात् देवदत्तः पुनः न जीवति।

**'अचः परस्मिन् पूर्वविधौ'**[22] इति सूत्रस्य प्रवचनस्य सन्दर्भे एतत् सुभाषितं प्रयुक्तमस्ति। देवदत्तनामकं यदा कश्चन हतवान् तदा तस्य बन्धुजनाः अपि गत्वा तं घातकं मारितवन्तः इति जगति दृष्टम्। परन्तु हन्तारस्य वधेन देवदत्तः पुनः जीवितः नाभवत्। इयं घटना**'न हि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति'**[23] इति सूक्तिरूपेण जनानां मध्ये लोकप्रियतां प्राप्तवती।

**'वाय्वोः'**(वायु+ओस्) इत्यत्र'उ' इत्यस्य स्थाने **'इको यणचि'**इत्यस्मात् **'व'** यणादेशइति तत्र **'वल्'** लोपः **'लोर्वलि' 'य'** इत्यस्य लोपः भवति। अस्मिन् विषये भाष्यकारः उक्तवान् यत् आदेशः विद्यमानः इति न स्वीक्रियते किन्तु अपूर्णः इति गण्यते; अनेन य लोपः न भविष्यति। अत्र उत्थापितः आक्षेपः अस्ति यत् यदि क्रमः स्थाने न मन्यते किन्तु अपूर्णः इति मन्यते तर्हि **'वाय्वोः'** इत्यादयः रूपाः सिद्धाः भविष्यन्ति; किन्तु**'पट्व्या'**{पटु+ङीष्(ई)+टाङ्(आ)} इत्यादि रूपं भविष्यन्ति। एतस्य व्याख्यानार्थं स्वाभाविकसुभाषितानां कृत्वा पतञ्जलिः उक्तवान् यत् अन्यः कश्चित् असिद्धः इति वदन् परसृष्टिः न सम्भवति **"न ह्यन्यस्यासिद्धत्वादन्यस्य प्रादुर्भावो भवति।तद्यथा- न हि देवदत्तस्य हन्तरि हते देव- दत्तस्य प्रादुर्भावो भवति"।**[24] 'पट्व्या'(पटु+ई+आ) अत्र 'इको यणचि '[25] इत्यस्मात् इ इत्यस्य स्थाने 'य' यणादेशः अस्ति। यदि एषः आदेशः अपूर्णः इति मन्तव्यः, तर्हि तस्य विकल्पः 'इ' कथमागमि- ष्यति? यणादेशेन नष्टं ततः 'पटु' इत्यस्य 'उ' स्थाने 'ई' इत्यस्य अभावात् 'इको यणचि' इत्यनेन 'व' यणादेशः न सम्भवति। यथा देवदत्तस्य घातकः इहलोके हतः, तथैव देवदत्तः पुनः न जीवति: सः मृतः, नष्टोऽस्ति। एवं प्रकारेण एतत् सुभाषितं पुषटयति यत् अत्र'ई' इत्यस्य स्थाने 'य' इत्यस्य स्थाने 'ई' इति पुनः प्रादुर्भवितुं न शक्नोति यदि यणादेशः अपूर्णः इति न मन्तव्यः, अपि तु स्थानिवत् इति मन्तव्यः, ततः 'पट्व्या' इति इष्टरूपं सिद्धं भविष्यति।

व्यवहारे वयं हिन्दीभाषायां एतत् सुभाषितं 'अब् पछताये होत क्या जब चुग गयी खेत' इति जानीमः।

**भिक्षुको द्वितीयां भिक्षां समासाद्य पूर्वां न जहाति**

भिक्षुकः द्वितीयां भिक्षां प्राप्य प्रथमां भिक्षां न त्यजति।

**'समर्थः पदविधिः**[26] 'अस्य सूत्रस्य व्याख्यानार्थमिदं सुभाषितं प्रयुक्तमस्ति। लोके दृश्यते यत् भिक्षाय याचकः परिभ्रमन्ति; एकस्मात् भिक्षां प्राप्य द्वितीयात् भिक्षां प्राप्नोति, द्वितीयात् तृतीयात् अस्मिन् क्रमे भिक्षुकः द्वितीयां दक्षिणां प्राप्य प्रथमां दक्षिणां न त्यजति[26], अपि तु तदपि स्वेन सह स्थाप- यित्वा सञ्चयति**-"भिक्षुकोऽयं द्वितीयां भिक्षां समासाद्य पूर्वा न जहाति "**[27] इति।

**'राजपुरुषः'**(राज्ञः पुरुषः) इत्यत्र **'अजहत्स्वार्था वृत्ति'**[28] इति विचार्य पूर्वपक्षी उक्तवान् यत् अत्र 'अजहत्स्वार्था' इति वृत्तिः स्वीक्रियताम्? अथ पतञ्जलिः अस्य सुभाषितस्य आधारेण व्याख्यायते यत् आम्, अत्र **'अजहत्स्वार्था** वृत्तिः' इति स्वीकारः सम्यक् स्यात् यथा भिक्षुकःद्वितीयभिक्षां प्राप्य प्रथ- मभिक्षां न त्यजति, तथैव 'राजपुरुषः' इत्यत्र द्वयोः शबदयोः स्वार्थान् न त्यजति तथा च अस्य समग्रस्य शब्दस्य समुदायरूपेण अर्थः भवति, अतः एकस्य शब्दस्य अर्थात् एकतायाः तस्मिन् वस्तुत्वात् द्वैतार्थं विचार्य द्विविधः न भविष्यति।

व्यवहारेऽपि वयं पश्यामः यत् यदि वयं प्रथमं प्रधीतं हिन्दीवर्णमाला पठितुं लिखितुं च शिक्ष- यामः ततः ABCD इत्यादीनि आङ्लवर्णमालाः शिक्षयामः तर्हि पराधीतः हिन्दीवर्णमालाज्ञानं धारयति स्म, आङ्लवर्णमालाज्ञानमपि स्वस्य समीपे एव स्थापितवान्। पश्चात् आङ्लभाषायाः वर्णमालाज्ञानं प्राप्ता पूर्वहिन्दी-भाषायाः वर्णमालाज्ञानं न विस्मृतवान्, परन्तु सः पूर्वं शिक्षितानि हिन्दीवर्णमालाः अपि च पश्चात् शिक्षितानि आङ्गलवर्णमाला अपि स्मरति स्म अर्थात् द्वितीयं (आङ्लवर्णमालाज्ञानं)प्राप्ता प्रथमं (हिन्दीवर्णमालाज्ञानं) न त्यक्तवान्, अपि तु उभयमपि सञ्चितवान्। एतदर्थं सम्यक् उक्तम्- "भिक्षुकोऽयं द्वितीयां भिक्षां समासाद्य पूर्वा न जहाति"।

**नात्यन्तायाज्ञानं शरणं भवितुमर्हति**

**'अज्ञानम्'**सर्वथा दोषस्य आश्रयः(रक्षा, रक्षकः) न भवितुमर्हति। अस्याः सूक्तेः प्रयोगः शब्दानां अपशब्दानां च ज्ञानेन धर्म-अधर्मयोः प्राप्तेः चर्चायाः सन्दर्भे कृते अस्ति। समाजे व्यवहारे वा दृश्यते यत् यः न जानाति अर्थात् अज्ञात्वा ब्रह्मणं कश्चित् मानवं वा हन्ति। अथवा मद्यपानं करोति, तदा सः अशुद्धः इति उच्यते- "यो ह्यजानन् वै ब्रह्मणं हन्यात् सुरां वा पिवेत् सोऽपि मन्ये पतितः स्यात्"।[30] हत्या इच्छया वा अज्ञाते वा हत्यां कुर्वन् व्यक्तिः निश्चितरूपेण हत्यायाः पापम् अपराधबोधं वा अनुभवति, दण्डञ्च प्राप्नोति। अतः एतत् सुभाषितरूपेणलोकप्रियं जातम् यत् 'अज्ञानम्' सर्वथा कस्यापि दोषस्य शरणं रक्षकं वा भवितुं न शक्नोति इति-

**"नात्यन्तायाज्ञानंशरणंभवितुमर्हति"।**

शब्द-अपशब्दज्ञानेन धर्म-अधर्मप्राप्तिविमर्शप्रसङ्गे यदा उक्तं यत् यो वाक्-योग-विभागं अर्थात् शब्दार्थात् प्रकृत्यावधारणं न जानाति, सः अधर्मवचन-अर्थ-दुष्टवचनज्ञानेन अधर्म कर्तुं न शक्नोति; यतः सः शब्दानां अपशब्दानाञ्च भेदं न जानाति, सः अज्ञानी अस्ति तदा अस्य

सुभाषितस्य माध्यमेन कथितं यत् कस्यापि त्रुटिः कस्यचित् अज्ञानं वा तस्य कृते सर्वथा आश्रयः रक्षणं वा न भवितुमर्हति सः अवश्यमेव "नात्यन्तायाज्ञानं शरणं भवितुमर्हति"[31] इति दुष्कृतं प्राप्स्यति।

व्यवहारेऽपि वयं पश्यामः यत् एकदा प्रभुः द्विचक्रिकया विद्यालयं गतवान्। ओलापुरग्रामे मार्गस्य पाश्र्वे प्रायः त्रिचतुर्वर्षीया बालिका क्रिडीकवती। प्रभुः बालिकायाः समीपं गन्तुं प्रवृत्तः आसीत् यदा तस्याः पादः पेडलात् स्खलिता अभवत्, तस्याः सन्लनं नष्टमभवत्। तदनन्तरं स द्विचक्रिकया सह यानस्य पाश्र्वे पतिता प्रभोः स्पर्शेन सा किञ्चित् आहता यस्मात् कारणात् सा रोदतिमारब्धा। रोदनं बालिकायाः पिता शीघ्रं धावनागत्य तस्मिन् स्थाने द्विचक्रिकाम् उत्थापितं दृष्ट्वा प्रभुं बहु ताडितवान्। अत्र प्रभुः इच्छया तस्याः अनिष्टं न कृतवान्, सः यदृच्छया आहता अभवत् तथापि तस्याः पिता तं बहु ताडितवान्। एतत् दृष्ट्वा जना केवलमेतदेव वदिष्यन्ति- 'अज्ञानं' सर्वथा कस्यापि दोषस्याश्रयः न भवति। आङ्लभाषायामपि उच्यते- Ignorance of law is no excuse. अविज्ञातोऽपि विधिभङ्गो दण्डयोग्यः भवति।

**कृतो घटो घटाश्रयाणां निमित्तं भवति, न क्रियमाणः**

केवलं निर्माणभूतं घटं घटाश्रितजलमानयनवाहनादीनां कार्याणां साधनं भवति, न तु निर्माणस्थितः घटः।

**'आद्युदात्तश्च'**[32] सूत्रकथनप्रसङ्गे एतत् सुभाषितम्। यत् घटं विनिर्मितं पच्यते च तत् जलादिवहने समर्थं भवति इति लोके दृश्यते। यः घटः अद्यापि क्रियतो सः जलमानयनादिवत् नचलति यत्किमपिकार्यं प्रौढेन अर्थात् पुष्टया एव सिद्ध्ययितुं शक्यते, न तु अपरिपक्केन उपयुक्तेन वा - **"कृतो घटो घटाश्रयाणां कार्याणां निमित्तं भवति, न क्रियमाणः "**।[33] अनया सूक्तया पतञ्जलिना पूर्वपक्षाय कथितं यत् यावत्प्रकृतौ 'प्रत्ययः' न योज्यते, तदा प्रत्ययनिर्भर उदात्त-अनुदात्त इत्यादि स्वर-कार्यं न सम्भवति; केवलं जनितः प्रत्ययः आश्रतिकर्मणां कारणं भवितुमर्हति न तु उत्पन्नः प्रत्ययः अर्थात् यः निमित्तः भवति, यथा कृतं घटमात्रं घटाश्रितं जलमा- नयादिकं कर्तुं शक्नोति न तु निमित्तं घटम्- "उत्पन्नः प्रत्ययः प्रत्ययाश्रयाणां कार्याणां निमित्तं भवति नोत्पद्यमानः। तद्यथा- कृतो घटो घटाश्रयाणां कार्याणां निमित्तं भवति, न क्रियमाणः"।

व्यवहारेऽपि वयं पश्यामः यत् यः वस्तुः प्राणी प्रौढः वा भवति सः एव किमपि कार्यं कर्तुं न शक्नोति; यदपक्कं न तेन कार्यं न सम्भवति। यथा- यदा कश्चित् चतुःपञ्चवर्षीयं बालकं हलवृषभैः क्षेत्रं कर्षति इति अपेक्ष्य बालकं क्षेत्रं प्रति प्रेषयति तदा एतत् दृष्ट्वा जनाः एतत् सुभाषितं प्रयुज्य तस्मै व्यक्तिं वदन्ति **"अरे महोदयः! कृतं घटमात्रं घटाश्रितं जलादीनामानयनकार्यं कर्तुं शक्नोति, न तु क्रियमाणः घटः। कृतो घटो घटाश्रयाणां कार्याणां निमित्तं भवति, न क्रियमाणः"**।।

**सामृतै पाणिभिर्घ्नन्ति गुरवो न विषेक्षितैः**

गुरुजनः(मातापितरौ वृद्धाः वा) अमृतपूरितहस्तैः बालकान् दण्डयति, चपेटां ददाति; न विष- पूर्णहस्तैः।

इदं सूत्रप्रवचनस्य सन्दर्भे **'वाक्यादेरामन्त्रिस्याऽसूयासमति-कोपकुत्सनभर्त्सनेषु'**[34] इति सुभा- षितस्य प्रयोगः कृता अस्ति। सार्वजनिकरूपेण दृश्यते यत् यदा बालकः त्रुटिं करोति यदिकश्चित् वीपरीतमार्गे गच्छन् दृश्यते तर्हि तस्य आचार्याः मातापितरौ वा अमृतपूरितहस्तैः(सुधारस्य भावनायाः प्रेमपूर्णैः) तं ताडयन्ति न विषपूर्णहस्तैः । शिक्षकाः बालकं सुधारार्थं दण्डयन्ति इति तात्पर्यम्; तस्मिन् दण्डे न ईर्षा क्रोः वा विद्यते, तेषां सुधारः अपि प्रेम्णा गुणानाम् उन्नतिं प्रवर्तनञ्च दृष्ट्वा क्रियते। यतः तेजानन्ति यत् अत्यधिकं स्नेहं बालकान् दूषयति, तेषुद ुष्टाः दोषाः वा विकसिताः भवन्ति तथा चकाले काले भर्त्सना अर्थात् दण्डदानेन गुणाः तेषु प्रविष्टाः भवन्ति-

**"सामृतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः।**

**लालनाश्रयिणो दोषास्ताडनाश्रयिणो गुणाः "**।।[35]

यदा पूर्वपक्षः स्ववादद्वारा लोके दृश्यते इति अवदत्। सः "न कश्चित् पुरुषः 'असूया'(ईर्ष्या) मुक्तः अर्थात् असूया विना सन् कस्यचित् 'आलोचनं' (निन्दा) न करोति तथा च'कोपः'(क्रोधः) वा मुक्तः पुरुषः कस्यचित् 'भर्त्सनं'(ताडयति, आलोचयति, दुरूपयोगं) न करोति इति अपि दृश्यते। एवं प्रकारेण पर्यायभावात् शब्दस्य प्रयोगस्य आवश्यकता नासीत्"। 'कुत्सान्' सह असूया तथा भर्त्ससनम् इति शब्दस्य स्वीकरणं निरर्थकम्। अथ प्राकृतसुभाषितमाश्रित्य पतञ्जलिना पूर्वपक्षिणां कथयत् यत् आचार्याः(मातापितरौ) स्वसन्ततिभ्यः यत्किमपि दोषं ददति तत् कुत्सनम्(निन्दा) तस्मिन् कुत्साने केनचित् प्रकारेण सूया(ईर्ष्या) अस्ति। सर्वथा न भवति अतः असूया इत्यनेन सह कुत्सन् इत्यस्यानुकरणयुक्तम्। भर्त्सनं इत्यत्र च आचार्याणां मातृपितृणां वा क्रोधः दृश्यते यथार्थतः ते क्रुद्धाः न भवन्ति, तस्मिन् क्रोधे सुधारस्य भावः भवति। अतः कोपः इत्यनेन सह भर्त्सनम् इत्यपि पृथक् पृथक् अनुमोदनयुक्तम्। यतः गुरुजनाः स्वसन्ततिम् अमृतपूर्णहस्तै आशीर्वादं ददति। ताडयेम न तु विषपूर्ण-हस्तैः-**"सामृतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः"।**

**न हि भुक्तवान् पुनर्भुङ्क्ते**

भुक्तवतः पुनर्भोजने प्रवृत्तिः नासीत्। **'इको झल्'**[36] सूत्रस्य व्याख्यानस्य सन्दर्भे एतत् सुभाषितं[37] प्रयुक्तं स्यात्। लोके दृश्यते यत् यः व्यक्तिः अन्नं खादित्वा अर्थात् भोजनं खादित्वा तृप्तः भवति; यदि तदा सद्यः खादितुं प्रार्थ्यते, सः अभक्षणाय न सज्जः न च खादति। यतः तस्य उदरं पूर्णमस्ति। खादति चेत् वमनं करिष्यति तस्य स्वास्थ्यं क्षीणं भविष्यति। एवम् इयं प्रसङ्गः सुभाषितरूपेण लोकप्रियः अभवत्-**'न हि भुक्तवान् पुनर्भुङ्क्ते'**[38] इति।

**'इकः''अज्झनगमां सनि'** इत्यस्मात् **'इग-न्त'** धातोः दीर्घप्राप्तेः सुभाषितस्याधारेण वदति यत् **'नी'** इत्यादि पूर्वमेव दीर्घः पुनः दीर्घः भवितुं न शक्नोति यथा- अन्नं खादित्वा तृप्तः पुरुषः पुनः सद्यः न खादति-**"न दीर्घाणां दीर्घाः प्राप्नुवन्ति। तद्यथा- न हि भुक्तवान् पुनर्भुङ्क्ते "**।[39]

व्यवहारेऽपि वयं पश्यामः यत् एकदा सुखीयायाः माता कूपात् जलं द्रोणिकया कलशे अपूर- यत् सुखिया अपि तत्र स्थिता आसीत्। कलशस्य पूरणानन्तरम् अर्धलोटा जलमवशिष्टमासीत् अतः तस्य तस्याः माता पूरितस्यपि कलशे अवशिष्टं जलं पातयति स्म, तत् जलं कलशे न तिष्ठति स्म, अधः अपतयत् जलमपव्ययः अभवत् एतत् दृष्ट्वा सुखिया मातरमवदत्- पितामही(राजेश्स्य माता) पात्राणि प्रक्षालति अवशिष्टं जलं द्रोणिकायां ददातु किमर्थ तत् अवशिष्टं जलं पूरितकुम्भे पातयसि, सः पिचरः पूर्णः अस्ति। न ज्ञायते यत् उदरं पूर्णं यस्य स न खादति।

**प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति**

**'षष्ठी स्थानेयोगा'**[40] इति सूत्रस्य भाष्ये एतत् सुभाषितं[41] प्रयुक्तमस्ति। लोके दृश्यते यत् दीपः यस्य पर्याप्तं तैलं सद्दिट् चभवति; यदि सः दीपः प्रज्वलितः गृहस्य दहलीयां स्थापितः स्थापितः भवति

तर्हि एकस्मिन् स्थाने स्थितोऽपि सः दीपकः सम्पूर्णं गृहम् अर्थात् गृहस्यान्तोऽपि चगृहस्य बहिः अपि स्वप्रकाशेन वस्तूनि प्रकाशयति[42] - 'प्रदीपः सुप्रज्वलितः सर्वं वेश्माभुज्वलयति'।

अस्याः लोकोक्तेः माध्यमेन महाभाष्यकारः 'परिभाषा'रूपेण त्रिविधाधिकारेषु प्रथमप्रकारस्य अधिकारस्य विषये कथितवान् यत् परिभाषारूपेण अयमधिकारः एकस्मिन् स्थाने स्थित्वा सम्पूर्णं शास्त्रं प्रभावितः, यथा सुप्रज्वलितः दीपः एकस्मिन् स्थाने स्थित्वा एव स्वप्रकाशेन सम्पूर्णं गृहं प्रकाशयति- "एकदेशस्थः सर्वं शास्त्रमिभ-ज्वलयति। तद्यथा- प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति "।[43]

व्यवहारेऽपि एकदा अभवत् यत् प्रत्येकस्मिन् ग्रामे बहवः बालकाः एकत्र क्रीडन्ति तथा अनेके बालकाः एकत्र अक्रीडन्। यदा कश्चन वृद्धः बालकं जलस्य घटम् आनेतुं पृष्टवान् तदा बालकः तद् उपेक्ष्य क्रीडितुमारब्धवान्, एतत् दृष्ट्वा गच्छन् कश्चन जनः बालकं व्याख्यातवान् यत् यः प्रतिदिनं वृद्धान् अभिवादयति सः तान् सेवते; सः स्वयमेव चत्वारि वस्तूनि प्राप्नोति- वयः, ज्ञानं, यशः,बलञ्च।

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम् ।।**[44]

इति श्रुत्वा बालकः सद्यः गृहं गत्वा जलमानय वृद्धाय दत्तवान्। ततः परं प्रायः सर्वे बालकाः ये तत् शिक्षाप्रदं खण्डं श्रुतवन्तः ते नित्यं स्वमातापितृणां शिक्षकानां वृद्धानाञ्च आज्ञापालनं कर्तुमारब्धवन्तः, तेषु सेवायाः परिचर्यायाः च भावना जागरिता आसीत् इदं कथ्यते- "प्रदीपः सुप्रज्वलितः सर्वं वेश्मा- भिज्वलयति"।

**पाद टिप्पणी**

1 व्या.महा.भा.१.१, आ.१
2 यजुर्वेदः अ.३१, मं.१६
3 शं.नि.श, पृ.सं.५
4 पाणिनीयशिक्षा, ४१
5 पाणिनीयशिक्षा ४२
6 व्या.महा.भा१.१, आ.१
7 व्या.महा.भा. १.१, आ.१
8 व्या.महा.भा.१.१, आ.१
9 व्या.महा.भा., पृ.सं.२४
10 व्या.महा.भा, पृ.सं. ३६
11 व्या.महा.भा,पृ.क्र. २७७
12 तीर्थकाकन्यायः तीर्थधाङ्क्ष्यन्यायः वा इति कथ्यते।
13 अ.सू- २.१.४
14 व्या.महा.भा.२, पृ. ३८३
15 एषः अलातचक्रन्यायः मृगतृष्णान्यायःवा अपि उच्यते।
16 सूत्रम्- ३.२.१२४
17 व्या. महा. भा. ३, पृ. १९९
18 एषा लोकोक्ति'न च मृगाः सन्तीति यवा नोप्यन्ते' एतस्मात् प्रभाविता।
19 सूत्रम्- ६.१.१३
20 व्या.महा.भा. १
21 व्या.महा.भा. ५, पृ. ३६
22 सूत्रम्- १.१.५७
23 व्या.महा.भा. ५, पृ. ९३
24 व्या.महा.भा. १, पृ. ४७७
25 सूत्रम्- ६.१.७७
26 सूत्रम्- २.१.१
27 'भिक्षुकभिक्षा-न्यायः' 'अजहत्स्वार्था वृत्ति' वा अपि उच्यते।
28 व्या.महा.भा. २, पृ. ३३१
29 यस्मिन् वृत्तौ समस्यमानपदाः स्वस्यार्थं न त्यजन्ति, सा'अजहत्स्वार्था' इति वृत्तिः कथ्यते।
30 व्या.महा.भा. १.१.१
31 व्या.महा.भा. १ पृ. ३४
32 सूत्रम्- ३.१.३
33 व्या.महा.भा. ३, पृ. १४
34 सूत्रम्- ८.१.८
35 व्या.महा.भा. ६-आ, पृ. २८
36 सूत्रम् - १.२.९
37 व्या.महा.भा.५, पृ. १३०
38 एषः भुक्तवतः पुनर्भोजने प्रवृत्तिन्यायः अपि उच्यते।
39 व्या.महा.भा. २, पृ. ९
40 सूत्रम् – १.१.४९
41 व्या.महा.भा. ६-आ, पृ. १७४
42 एषः 'देहलीदीपकन्यायः' अपि उच्यते।
43 व्या.महा.भा. १, पृ. ४१०
44 मनुस्मृतिः २.१२१